कमले।) एवंप्रकारः। एतद्रूपः। इति मुग्ध-बोधं॥ यथा,—"अमूदृशी तत् कविवन्दि-वर्णितैः"। इति नैषधं॥

अमूलकं, त्रि, मूलरहितं। प्रमाणशून्यं। नास्ति मूलं यस्येति बहुव्रीह्यर्थे कप्रत्ययः॥

अमूला, स्त्री, (नास्ति मूलं शिफा यस्याः सा, स्त्रियां टाप्।) अग्निशिखावृक्षः। इति शब्दचन्द्रिका॥ मूलरहिते त्रि। इति मुग्धबोधं॥

अमृणालं, क्ली, (मृणालतुल्यं सादृश्ये नञ्समासः, तस्य मृणालसदृशकोमलत्वात् तथात्वं।) वीरण-मूलं। इत्यमरः॥

अमृतं, क्ली, (मृ+भावे क्तः, नास्ति मृतं मरणं यस्मात् तत्, तत्पायिनां मरणाभावात् तस्य तथात्वं।) समुद्रोद्भवदेवभक्ष्यामरत्वजनकद्रव्यवि-शेषः। यदा पृथुराजभयेन पृथ्वी गौर्भूता तदा देवा इन्द्रं वत्सं कृत्वा हिरण्मयपात्रे अमृतरूप-पयोऽदुदुहन् तत्तु दुर्व्वाससः शापात् समुद्रमध्यं गतं पश्चात् समुद्रमथने अमृतपूर्णकलसं गृहीत्वा धन्वन्तरिरुत्थितः। इति भारतभागवते॥ तत्-पर्य्यायः॥ पीयूषं २ सुधा ३। इत्यमरः॥ पेयूषं ४। इति तट्टीकासारसुन्दरी॥ * ॥ निर्जरं ५। समुद्रनवनीतकं ६। इति शब्दरत्ना-वली॥ जलं। घृतं॥ यज्ञशेषद्रव्यं॥ अयाचित-वस्तु॥ मुक्तिः। इति मेदिनी॥ दुग्धं। औषधं। विषसामान्यं। वत्सनाभः। पारदः। इति राज-निर्घण्टः॥ अन्नं। धनं। स्वर्णं। भक्षणीयद्रव्यं। हृद्यं। स्वादुद्रव्यं। इति हेमचन्द्रः॥

अमृतः, पुं, (मृ+कर्त्तरि क्तः, नञ्समासः।) धन्व-न्तरिः। देवता। इति मेदिनी। वाराहीकन्दः। वनमुद्गः। इति राजनिर्घण्टः॥ सुन्दरः। अति-हृद्यः। इति भरतधृतव्याडिः॥ (आत्मा, यथा महाभारते,—

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यस्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तादमृतः परः।
अमृतान्न परं किञ्चित् सा काष्ठा सा परा गतिः"॥

सूर्य्यः॥ सुरपतिरिन्द्रः॥ विष्णोः सहस्रनाममध्ये परिगणितो नामभेदः॥) मरणरहिते त्रि। यथा। "अमृते जारजः कुण्डः"। इत्यमरः॥

अमृतजटा, स्त्री, (अमृतवत् सुस्वादुर्जटा यस्याः सा।) जटामांसी। इति राजनिर्घण्टः॥

अमृततरङ्गिणी, स्त्री, (अमृतस्य पीयूषस्य तरङ्गिणी नदीव।) ज्योत्स्ना। इति राजनिर्घण्टः॥

अमृतदीधितिः, पुं, (अमृतवत् सन्तोषकारिण्यः दीधितयो यस्य सः।) चन्द्रः। इति शब्दरत्नावली॥ ("अमृतदीधितिरेष विदर्भजे भजति तापम-मुष्य"। इति नैषधे।)

अमृतफलं, क्ली, पुं, (अमृतमिव स्वादु फलं।) पारा-वतवृक्षः। पटोलः। इति राजनिर्घण्टः॥ नास-पाती। इति पारस्य भाषा। यथा। अथामृतफलं यदुक्तसातकाविलप्रभृतिदेशेषु नासपाती इति प्रसिद्धं।

"अमृतफलं लघु वृष्यं सुस्वादु चीन् हरेद्दोषान्।
देशेषु मुद्गलानां बहुलं तल्लभ्यते लोकैः"॥
इति भावप्रकाशः॥

अमृतफला, स्त्री, (अमृतवत् स्वादु फलं यस्याः सा, स्त्रियां टाप्।) द्राक्षा। आमलकी। इति राज-निर्घण्टः॥ (लघुखर्ज्जूरीवृक्षः। फलविशेषः। नासपाती। इति पारस्यभाषा।

अमृतवल्ली, स्त्री, (अमृतवत् वल्ली, तस्या रोग-नाशकत्वात् तथात्वं।) गुडूची। इति रत्नमाला॥

अमृतरसा, स्त्री, (अमृतवत् स्वादुः रसो यस्याः सा, स्त्रियां टाप्।) कपिलद्राक्षा। इति राज-निर्घण्टः॥ (पक्वान्नविशेषः॥ सा च

"तृतीयभागखण्डेन मिश्रितं पिष्टपिष्टकं।
शुभ्रमीषद्दधियुतं मर्द्दयेद्दृढपाणिना॥
एवं समुद्धृतं कृत्वा स्थापयेद्वनीमितं।
ततोऽन्यस्मिन्नहनि तु चिपितं निस्त्वचैस्तिलैः॥
विधायापूपकं तेन तम्बिकायां घृते पचेत्।
ततोऽमृतरसा जाता वातहृद्बलवर्द्धिनी"॥
इति भावप्रकाशे।)

अमृतसम्भवा, स्त्री, (सम्+भू+भावे अप्, अमृ-तस्य मरणाभावस्य रोगाभावस्य इति यावत् सम्भव उत्पत्तिर्यस्याः सा, स्त्रियां टाप्।) गुडूची। इति राजनिर्घण्टः॥

अमृतसारजः, पुं, (अमृतस्य सारः तस्मात् जायते, अमृतसार+जन्+डः, उपपदसमासः।) गुडः। तवराजोद्भवखण्डः। इति राजनिर्घण्टः॥

अमृतसूः, पुं, (अमृतं तुषारं सूते, अमृत+सू+क्विप्, उपपदसमासः।) (अमृतान् देवान् सूते, अमृत+सू+क्विप्, उपपदसमासः।) चन्द्रः। इति हेमचन्द्रः॥ देवमातरि स्त्री। अमृतानां देवानां सूः प्रसूतिः॥

अमृतसोदरः, पुं, (अमृतस्य सोदरः सोदर्य्यः तस्य एकस्थानादुत्पन्नत्वात् तथात्वं।) घोटकः। इति राजनिर्घण्टः॥ (उच्चैःश्रवा अश्वः।

"सुरादेवी समुत्पन्ना तुरगः पाण्डरस्तथा"।
इति भारते।)

अमृतस्रवा, स्त्री, (स्रवति इति स्रु+अच्। स्त्रियां टाप्। अमृतस्य स्रवा षष्ठीतत्पुरुषः।) रुदन्ती-वृक्षः। लताविशेषः। तत्पर्य्यायः। वृत्ताम्लहा २ उपवल्लिका ३ घनवल्ली ४ सितलता ५। अस्या गुणाः। पथ्यत्वं। ईषत्तिक्तत्वं। रसायनत्वं। व्रणनाशित्वं। विषकुष्ठामकामलाश्वयथुक्षयकारि-त्वञ्च। इति राजनिर्घण्टः॥

("उक्ताऽमृतस्रवा पथ्या ईषत्तिक्ता रसायनी।
व्रणघ्नी विषकुष्ठामं कामलां श्वयथुं जयेत्"॥
इति राजनिर्घण्टः।)

अमृता, स्त्री, (नास्ति मृतं मरणं यस्याः सा।) गुडूची। मदिरा। इन्द्रवारुणी। ज्योतिष्मती। गोरक्षदुग्धा। अतिविषा। रक्तत्रिवृत्। दूर्व्वा। आमलकी। हरीतकी। इति राजनिर्घण्टः॥ तुलसी। इति शब्दमाला॥ पिप्पली। इति मेदिनी॥ चम्पादेशजस्थूलमांसा हरीतकी। सा विरेचने प्रशस्ता। इति राजवल्लभः॥ (सूर्य्य-दीधितिविशेषाः।

("सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः"।
इति रघुवंशे।)

अमृतान्धः, [स्] पुं, (अमृतमन्धः अन्नमिव तृप्ति-करं यस्य सः।) देवता। इत्यमरः॥ (अमृतं सुधा अन्धो भक्ष्यं यस्य सः।)

अमृताफलः, पुं, (अमृतमिव फलं यस्य, पृषोदरादि-त्वात् दीर्घः।) पटोलः। इति रत्नाभिधानं॥

अमृताशनः, पुं, (अमृतं अश्नाति भुङ्क्ते, अश+बाहुल्यात् कर्त्तरि ल्युट्। अमृतस्य अशनः, षष्ठीतत्पुरुषः।) देवता। इति हलायुधः॥

अमृताष्टकं, क्ली, (अमृताप्रभृति अष्टकं यस्य तत्।) हरितक्याद्यष्टद्रव्यं। यथा,—

"अमृता कटुकारिष्टपटोलघनचन्दनं।
नागरेन्द्रयवञ्चैतदमृताष्टकमीरितं॥
कथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहं।
हृल्लासारोचकच्छर्द्दितृष्णादाहनिवारणं"॥
इति भावप्रकाशः॥

अमृतासङ्गं, क्ली, (अमृतस्येव आसङ्गो यस्य तत्।) तुत्थविशेषः। तत्पर्य्यायः। कर्परिकातुत्थं २ अञ्जनं ३। इति हेमचन्द्रः॥

अमृताहरणः, पुं, (अमृतमाहरति, मातृदास्याप-नयनार्थं स्वर्गात् भूलोकं नयति, आ+हृ+कर्त्तरि ल्युट्, ततः षष्ठीतत्पुरुषः।) गरुडः। इति हारावली॥ ("पुरा किल गरुडो मातु-र्विनतायाः सपत्नीदास्यनिवारणार्थं सर्व्वदेवान् विनिर्जित्य सोमरक्षकचक्रेदनयन्त्रादिकमतिक्रम्य स्वर्गादमृतं नागकुलाय दातुमाहृतवान्"। इति पौराणिकी कथा। महाभारतस्यादिपर्व्वणि।

"श्रुत्वा तमब्रुवन् सर्पा आहरामृतमोजसा।
ततो दास्याद्विप्रमोक्षो भविता तव खेचर!॥
इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत्॥
गच्छाम्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुं॥
.. ..
स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके।
परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयं॥
ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्।
.. ..
अच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः॥
समुत्पाट्यामृतं तत्र वैनतेयस्ततो बली।
उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्य्यवान्॥
... ...
एवं तदमृतं तेन हृतमाहृतमेव च।
द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना"॥)

अमृताह्वं, क्ली, (अमृतमाह्वयते स्पर्द्धते, आ+ह्वे+कः, तस्य तुल्यस्वादत्वात् तथात्वं।) लघुविल्वफलाकृतिखोरासानदेशजनासपातीना-मफलं। तत्पर्य्यायः। दृढफलं २। अस्य गुणाः। गुरुत्वं। वातनाशित्वं। स्वादुत्वं। अम्लत्वं। रुचिशुक्रकारित्वञ्च॥ तत्पक्वफलगुणाः। वृष्यत्वं। सुस्वादुत्वं। त्रिदोषनाशित्वञ्च। तत् मुद्गलदेशे